# आत्रेय शिक्षा

अथ क्रमव्युत्क्रमाद्यतो जटा भवेदार्षजसंधिजस्वरात्
विलोक्य शिक्षादिकमादरात्ततः प्रकाश्यते सा विदुषां मुदे मया १
पदद्वयनिमित्तं स्यादेका भावेति तत्र तु
संहितावत्क्रमे ज्ञेयस्तद्वत् ज्ञेया जटा बुधैः २
स्वरवर्णादभेदः स्यादनिद्धं द्वितयस्य च
जटा विचक्षणैरुक्तं क्रमोच्चारणमत्र तु ३
लस्वरात्स्वरवर्णाच्च दीर्घञ्च परतस्थितः
एकवर्णाच्च दीर्घञ्च पदञ्चैव इदानीं तुल्य उच्यते ४
अनित्यतृणयकारस्य व्यञ्जने तु निमित्तके
जटाधान्नैव लोपः स्यादकारस्येति निर्णयः ५

---

प्रश्नानुवाका प्रारंभे सविसर्गोच्चको हरिः २०
असन्धिः प्रणवस्यादौ विरामे स्वरितो भवेत्
विधे मद्ध्यस्थनासिक्यो न विरोधो भवेत्स्मृतः
तस्मात्करोति कार्याणि वर्णानां धर्म एष तु
इन्द्रधा विषयो यो सा वर्णरित्युच्यते बुधैः
चतुर्भिरणुभिर्मात्रा परिमाणमिति स्मृतम्
रंगप्लुश्चतुर्मात्रः शुद्धप्लुतस्त्रिमात्रिकः
दीर्घ उच्च द्विमात्रः स्याद्ध्रस्वश्चाप्येकमात्रिकः
परस्वरस्य संयोगस्पर्शानां सुभवेद्यदि
तयोरादिश्रुतिर्नास्ति विरामव्यञ्जनस्य च

अनन्त्यञ्च भवेत्पूर्वमन्त्यञ्च परतो यदि
तयोर्मर्द्ध्ये यस्तिष्ठन् नासिकास्थानमुच्यते
नासिक्यत्वमुरस्यत्वं पञ्चमैर्हस्य योगतः
अन्तस्थाभिरुरस्यत्वं कराडकत्वं केवलस्य तु
पदादौ पदमध्ये वा स्थितस्योष्मपरस्य वै
प्रथमस्य द्वितीयत्वं पूर्वं कुर्वीत पण्डितः
धूद्रुक्ष्णौ द्रुन्द्रुक्ष्णाषमित्यत्र अनुस्वारो विधर्मतः

इत्यात्रेयशिक्षा

Reference:
Descriptive Catalogue of Manuscripts of the VVBISIS Collection, Panjab University, compiled by B.R. Sharma, Hoshiarpur: Vishveshvaranand Vishva Bandhu Institute of Sanskrit and Indological Studies, 1975, xi, p. 300, #4371. Collection currently housed at the DAV College in Chandigarh.